# गोपीनाथस्तुतिः (भविष्यत्तर पुराणां)

नारद उवाच
दद्दशुस्ते सुरा देवं शंखचक्रगदाधरं। पीतांबरपरीधानं सर्वतोऽक्षिशिरोमुखं ॥ 1 ॥
सर्वतः पाणिपादं तं सर्वसुंदरमीश्वरं।
नमस्कृत्वा सगंधर्वाः पूजयामासुरच्युतं ॥
तदा स्तोत्रं प्रचक्रुस्ते सर्वाभीष्टप्रदं नृणां । 2 |
देवा ऊचुः
दीनानाथदयासिंधो योगिहृत्पद्मसंस्थित || 3 ॥
अनादिसिद्ध अव्यक्त भूतानामीश्वर प्रभो |
त्वं गतिः सर्वलोकानां दीनानां दीनवत्सल || 4 ॥
अनेकपापनिकरदावभूत जगत्पते ।
अस्माकं सर्वशक्तिस्लं तुभ्यं सर्वात्मने नमः || 5 ॥
सर्वभूताशयस्वं हि सर्वभूतहृदि स्थितः ।
सर्वभूतातिरिक्तस्वं तुभ्यं सर्वात्मने नमः ॥ 6 ॥
जगद्भास चिदाभास ज्ञानगम्यनमो नमः ।
त्रिलोकेश गुणातीत गुणकोभ नमो नमः ॥ 7 ॥
नमस्ते करुणानाथ नमस्ते दानवांतक ।
नमस्ते पापभीरूणां तारकाय नमो नमः || 8 ॥
शंखासुरबलघ्राय वेदसंरक्षणाय च ।
पालकाय च लोकानां मत्सरूपाय ते नमः || 9 ॥
समुद्रमथने पूर्वं मंदराचलधारिणे ।
दुष्टदानवहाराय वैकुंठाय नमो नमः ॥ 10 ॥
यज्ञवाराहरूपाय धरणीतारणाय च ।
दुष्टघ्नाय नमस्तुभ्यं सृष्टिरूपाय ते नमः ॥ 11 ॥
हिरण्यकशिपुघ्नाय प्रह्लादप्रियकारिणे ।
अस्माकं दुःखहाराय नृसिंहाय नमो नमः ॥ 12 ॥
बलिदर्पहरे तुभ्यं शक्रस्य प्रियकारिणे ।
अस्माकं दुःखनाशाय वामनाय नमो नमः ॥ 13 ॥
क्षत्रियस्य कुलोत्पन्ननाशकाय नमो नमः ।
क्रूरायापि च रामाय नमः परशुधारिणे ॥ 14 ॥

अस्माकं बंधनाशाय दशग्रीवांतकाय च।
मुनिमानसहंसाय रामचंद्राय ते नमः ॥ 15 ॥

शेषाय दानवघ्नाय नमो हलधराय च ।
कंसांतकाय देवाय रामकृष्णाय ते नमः ॥ 16 ॥

तपोरूपाय मौनाय नमः कारुण्यमूर्तये ।
पालकाय च लोकानां बौद्धरूपाय ते नमः ॥ 17 ॥

म्लेच्छांतकाय दुष्टानां दैत्यानामंतकाय च।
भक्तिप्रियाय देवाय कल्किरूपाय ते नमः ॥ 18 ॥

भयदाय हि दुष्टानां दानवानां भयं भवेत् ।
तदा तदाऽवतीर्णाय तुभ्यं कारुण्यमूर्तये ॥ 19 ॥

एवं स्तुत्वा तदा देवाः पुष्पवृष्टिमवाकिरन् ।
तानुवाच सुरान् देवस्यपोऽहं भवतां स्तवैः ॥ 20 ॥

पूजया चैकभुक्याच प्रातःस्नानेन फाल्गुने ।
संकष्टहरमेतच्च स्तोत्रं रम्यं भविष्यति ॥ 21 ॥

य इदं पठते नित्यं संकष्टं तस्य नश्यति ।
एकवारं द्विवारं वा त्रिवारं वापि यः पठेत् ॥ 22 ॥

वांछितं लभते नित्यं यश आयुःप्रवर्धनं ।
सप्तवारं पठेन्नित्यं मासि फाल्गुनके सुराः ॥ 23 ॥

ब्राह्मणो लभते विद्यां क्षत्रियस्तु वसुंधरां ।
धनं च लभते वैश्याः शूद्रस्तु सुखमश्नुते ॥ 24 ॥

नाभिमात्रं जले स्थित्वा मासि फाल्गुनके शुभे ।
सप्तवारं पठेद्यस्तु भार्यां प्राप्योत्यसंशयः ॥ 25 ॥

मातृहा पितृहा चैव ब्रह्मघ्नो गुरुतल्पगः ।
सुरापी दासिगामी च अनेकैः पातकैर्वतः ॥ 26 ॥

सप्तवारं दिने भान्भानोश्चाभिमुखं पठेत् ।
निष्पापश्च भवेत्सऽपि नात्र कार्या विचारणा ॥ 27 ॥

दशावर्तं पठेन्नित्यं भूमिशायि जितेंद्रियः ।

देवतायतने विद्वान् शुचिमान् मम सन्निद् ॥ 28 ॥
त्रिःसप्ताहं पठेद्यस्तु तस्य पुत्रो भविष्यति ।
त्रयस्त्रिंशतिवारं तु यः पठेत् रजनीमुखे ॥ 29 ॥
मासेन चानघास्तस्य कुष्ठनाशो भविष्यति ।
विद्यार्थि लभते विद्यां धनार्थि लभते धनं ॥ 30 ॥
कन्यार्थी लभते कन्यां निष्कामो मोक्षमाप्नुयात्